अथादुधान्यराशिमानानयनाय

न्यासः




परिधिः ६० । वेधः $\frac{६०}{११}$ । जातं फलम् ५४५ $\frac{५}{११}$ ।

अथ मूकधान्यराशिमानानयनाय

न्यासः




परिधिः ६० । वेधः $\frac{२०}{३}$ । खार्यः १६६ $\frac{२}{३}$ ।

अथ भित्त्यन्तर्बाह्यकोणसंलग्नराशिप्रमाणानयने करणसूत्रं वृत्तम् ।

"द्विवेदसन्निभागैकनिघ्नात् परिधेः फलम् ।
भित्त्यन्तर्बाह्यकोणस्थराशेः स्वगुणभाजितम् ॥"

उदाहरणम् ।

"परिधिर्भित्तिलग्नस्य राशेस्त्रिंशत्करः किल ।
अन्तःकोणस्थितस्यापि तिथितुल्यः करः सखे ।
बहिः कोणस्थितस्यापि पञ्चघ्ननवसम्मितः ।
तेषामाचक्ष्व मे क्षिप्रं घनहस्तान् पृथक् पृथक् ॥"

अत्रापि सूक्ष्मादिधान्यानां राशिमानाव-
बोधनाय क्षेत्रत्रयम् ।

तत्रादावणुधान्यराशिमानबोधकं क्षेत्रम् ।

न्यासः




अत्रादौस्य परिधिः ३० । द्विनिघ्नः ६० । अन्यः १५ । चतुर्घ्नः ६० । अपरः ४५ । सत्रि-
भागेन $\frac{४}{३}$ निघ्नः ६० । एषां वेधः ६ । एभ्यः फलं तुल्यमेतावत्स एव खार्यः ६०० । एतत्-
स्वगुणेन भक्तं जातं पृथक् पृथक् फलम् ३०० । १५० । ४५० ॥

अथाणुधान्यराशिमानानयनाय

न्यासः




पूर्ववत् क्षेत्रत्रयाणां स्वगुणगुणितपरिधिः ६० ।
वेधः $\frac{६०}{११}$ । फलानि २७२ $\frac{८}{११}$ । १३६ $\frac{४}{११}$ ।
४०९ $\frac{१}{११}$ ।

अथ मूकधान्यराशिमानानयनाय

न्यासः




अत्रापि पूर्ववत् क्षेत्रत्रयाणां स्वगुणगुणितः
परिधिः ६० । वेधः $\frac{२०}{३}$ । फलानि ३३३ $\frac{१}{३}$ ।
१६६ $\frac{२}{३}$ । ५०० ।

इति लीलावत्यां राशिव्यवहारः समाप्तः ॥

राष्ट्रं, पुं, क्ली, ( राजते इति । राज्+"सर्व-
धातुभ्यः ष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् ।
अर्द्धर्चादित्वात् पुंस्त्वमपि । ) विषयः । ( यथा, मनुः । ६ ।
२५४ ।
"अशास्तंस्करान् यस्तु बलिं गृह्णाति पार्थिवः ।
तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गाच्च परिहीयते ॥")
उपद्रवः । इत्यमरः । ३ । ३ । १८३ ॥ विषयो
जनपदः । उपद्रवो मरकादिः । इति भरतः ॥
( राष्ट्रपालननियमादिकं महाभारते १२ ।
८७ अध्याये द्रष्टव्यम् ॥ * ॥ पुं, पुरूरवोवंश्य-
जातस्य काशेः पुत्रः । यथा, भागवते । ६ ।
१७ । ४ ।
"काशस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमः
पिता ॥" )

राष्ट्रनिवासी, [ न् ] पुं, ( राष्ट्रे निवसतीति ।
नि+वस्+णिनिः । ) जानपदः । देशवासी ।
इति त्रिकाण्डशेषः ॥

राष्ट्रिका, स्त्री, ( राष्ट्रं उत्पत्तिस्थानत्वेनास्त्यस्या
इति । राष्ट्र+ठन् । टाप् । ) कण्टकारिका ।
इत्यमरः । २ । ४ । ६३ ॥ ( पुं, राष्ट्रवासी ।
जानपदः । यथा, मनुः । १० । ६१ ।
"यत्र त्वेते परिध्वंसा जायन्ते वर्णदूषकाः ।
राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति ॥"
राष्ट्रपतिः । यथा, हरिवंशे । १८३।२७—२८ ।
"कुष्माण्ड ! मन्त्रिणां श्रेष्ठ ! प्रीतोऽस्मि तव
सुव्रत ।
सुव्रतत्वं विजानामि राष्ट्रिकोऽस्तु भवानिह ॥
सत्रातिपच ! सुसखी निर्वृतोऽस्तु भवानिह ।
राज्यञ्च ते मया दत्तं चिरं जीव ममा-
श्रयात् ॥" )

राष्ट्रियः, पुं, ( राष्ट्रेऽधिकृतः । राष्ट्र+"राष्ट्रा-
वारपाराद् घखौ ।" ४ । २ । ९३ । इति घः ।
यद्वा, राष्ट्रे जातः । "तत्र जातः ।" ४ । ३ ।
२५ । इति घः । ) नाट्योक्तौ राजश्यालः ।
इत्यमरः । १ । ७ । १४ ॥ ( राष्ट्राध्यक्षः ।
यथा, महाभारते । १२ । ८५ । १२ ।
"ततः संप्रेषयेद्राष्ट्रे राष्ट्रियाय च दर्शयेत् ॥")

राष्ट्रीयः, पुं, ( राष्ट्रे भव इति । राष्ट्र+छः । )
नाट्योक्तौ राजश्यालः । इति हेमचन्द्रः । २ ।
२४ ॥ राष्ट्रसम्बन्धिनि, त्रि ॥ ( यथा, महा-
भारते । १२ । ८७ । ६ ।
"धान्यं हिरण्यं भोगेन भोक्तुं राष्ट्रीयसञ्चयम् ॥")

रास, ऋ ङ शब्दे । इति कविकल्पद्रुमः ॥ ( भ्वा०-
आत्म०-अक०-सेट् । ) ह्रस्वान्तोऽयमिति गद-
सिंहः । रासभः खरः । दुर्गसिंहस्त्विमं ताल-
व्यान्तं मत्वा उणादौ ह्रस्वं कृत्वा रशिमशब्द-
मुत्पादितवान् । ऋ, अररासत् । ङ, रासते ।
इति दुर्गादासः ॥

रासः, पुं, ( रासनमिति रासतेऽनेनेति वा । रास
शब्दे+भावे अधिकरणे वा घञ् । ) कोला-
हलः । ध्वनिः । भाषाशृङ्खलकः । गोपानां
क्रीडाभेदः । इति मेदिनी । से, ११ ॥ तस्य
विधिर्यथा,—
"कार्त्तिकीपूर्णिमायाञ्च कृत्वा तु रासमण्डलम् ।
गोपानां शतकं कृत्वा गोपीनां शतकन्तथा ॥
शिलायां प्रतिमायां वा श्रीकृष्णं राधया सह ।
भारते पूजयेत् कृत्वा चोपहाराणि षोडश ॥
गोलोके च वसेत् सोऽपि यावद्वै ब्रह्मणो वयः ।
भारतं पुनरागत्य हरिभक्तिं लभेद्दृढम् ॥
क्रमेण सुदृढां भक्तिं लब्ध्वा मन्त्रं हरेरपि ।
देहं त्यक्त्वा च गोलोकं पुनरेव प्रयाति च ॥
तत्र कृष्णस्य सारूप्यं संप्राप्य पार्षदो भवेत् ।
पुनस्तत्पतनं नास्ति जरामृत्युहरो महान् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २५ अध्यायः ॥
विस्तारस्तु श्रीकृष्णजन्मखण्डे २८ अध्याये
श्रीमद्भागवतीयरासपञ्चाध्यायेषु च द्रष्टव्यः ॥ * ॥
कस्यचिन्मते कल्पतरुयात्रेयम् । अस्य विधि-
र्यथा,—
"कार्त्तिके पौर्णमास्यान्तु रासयात्रा महानिशि ।
नन्दस्तनोः प्रकर्त्तव्या महाविभवविस्तरैः ॥
इह लोके सुखं प्राप्य अन्ते विष्णुपुरं व्रजेत् ।
पूजा कार्य्याहरात्रे तु नयेत् शेषं महोत्सवैः ।
गीतैर्नानाविधैर्वाद्यैर्वर्णवीणामृदङ्गकैः ॥
नृत्यैर्वराङ्गनागीतैरङ्गनानाञ्च कीर्त्तनैः ।